॥ क्षेत्रपाल मण्डल देवतानां आवाहनम् होमः ॥



ॐ नमोस्तु सर्पेभ्यो ये के च प्रथिवी मनु ।
ये अंतिरिक्षे ये दिवि तेभ्यो : सर्पेभ्यो नमः ॥

यं यं यं यक्ष रूपं दशदिशिवदनं भूमिकम्पायमानं।
सं सं सं संहारमूर्ती शुभ मुकुट जटाशेखरम् चन्द्रबिम्बम् ॥

दं दं दं दीर्घकायं विकृतनख मुखं चौर्ध्वरोयं करालं।
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

- वायव्य कोण में ५१ खाने का क्षेत्रपाल की स्थापना करें।
- स्थापना हेतु आ. स्था. पू. एवं स्वाहाकार हेतु स्वाहा का प्रयोग करें।

1. ॐ क्षेत्रपालाय नमः
2. ॐ अजराय नमः
3. ॐ व्यापकाय नमः
4. ॐ इन्द्रचौराय नमः
5. ॐ इन्द्रमूर्तये नमः
6. ॐ उक्षाय नमः
7. ॐ कूष्माण्डाय नमः
8. ॐ वरुणाय नमः
9. ॐ बटुकाय नमः
10. ॐ विमुक्ताय नमः
11. ॐ लिप्तकायाय नमः
12. ॐ लीलाकाय नमः
13. ॐ एकदंष्ट्राय नमः
14. ॐ ऐरावताय नमः
15. ॐ ओषधिघ्नाय नमः
16. ॐ बन्धनाय नमः
17. ॐ दिव्यकाय नमः
18. ॐ कम्बलाय नमः
19. ॐ भीषणाय नमः
20. ॐ गवयाय नमः
21. ॐ घण्टाय नमः
22. ॐ व्यालाय नमः
23. ॐ अणवे नमः
24. ॐ चन्द्रवारुणाय नमः
25. ॐ पटाटोपाय नमः
26. ॐ जटालाय नमः
27. ॐ क्रतवे नमः
28. ॐ घण्टेश्वराय नमः
29. ॐ विटंकाय नमः
30. ॐ मणिमानाय नमः
31. ॐ गणबन्धवे नमः
32. ॐ डामराय नमः
33. ॐ ढुण्ढिकर्णाय नमः
34. ॐ स्थविराय नमः
35. ॐ दन्तुराय नमः
36. ॐ धनदाय नमः
37. ॐ नागकर्णाय नमः
38. ॐ महाबलाय नमः
39. ॐ फेत्काराय नमः
40. ॐ चीकराय नमः
41. ॐ सिंहाय नमः
42. ॐ मृगाय नमः
43. ॐ यक्षाय नमः
44. ॐ मेघवाहनाय नमः
45. ॐ तीक्ष्णोष्ठाय नमः
46. ॐ अनलाय नमः
47. ॐ शुक्लतुण्डाय नमः
48. ॐ सुधालापाय नमः
49. ॐ बर्बरकाय नमः
50. ॐ पवनाय नमः
51. ॐ पावनाय नमः

॥ मध्य चतुरस्त्रे अष्टदल पद्मे क्षेत्रपाल मुर्तिं नाधाय क्षेत्रपालं स्थापयेत् ॥

- **संकल्प** — अद्यपूर्वोच्चारित एवं शुभ पुण्य तिथौ मया प्रारब्धस्य अमुक कर्मणांगत्वेन अस्मिन क्षेत्रपाल पीठे मध्य क्षेत्रपाल पूजन पूर्वकं एकोन पंचाशत् क्षेत्रपाल देवानां स्थापन प्रतिष्ठा पूजनानि करिष्ये।

1. क्षेत्रपालाय

ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु।
ये अन्तिरिक्षे ये दिवि तेभ्य: सर्पेभ्यो नमः ॥

- ॐ भुर्भुवः स्वः क्षेत्रपालाय नमः। क्षेत्रपालम् आवाह्यामि स्थापयामि। भो क्षेत्रपाल इहागच्छ इहतिष्ठ।

॥ पूर्व दिशा - प्रथम कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

1. अजराय

ॐ पावकया यश्चितयन्त्या कृपा क्षामन्त्रु रुच ऽ उषसो नभानुना।
तूर्वन्न यामन्नेतशस्य नू रण ऽ आ यो घृणे न ततृषाणो अजरः ॥

- ॐ भुर्भुवः स्वः अजराय नमः। अजरम् आवाह्यामि स्थापयामि। भो अजर इहागच्छ इहतिष्ठ।

2. व्यापकाय

ॐ प्रथमा वा ७ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥

- ॐ भुर्भुवः स्वः व्यापकाय नमः। व्यापकम् आवाह्यामि स्थापयामि। भो व्यापक इहागच्छ इहतिष्ठ।

3. इन्द्रचौराय

ॐ इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः।
सेमान्नो हव्यदाति जुषाणो देव रथ प्रति हव्या गृभाय ॥

- ॐ भुर्भुवः स्वः इन्द्रचौराय नमः। इन्द्रचौरम् आवाह्यामि स्थापयामि। भो इन्द्रचौर इहागच्छ इहतिष्ठ।

4. इन्द्रमूर्तये

ॐ एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः।
स न स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥

- ॐ भुर्भुवः स्वः इन्द्रमूर्तये नमः। इन्द्रमूर्तिम् आवाह्यामि स्थापयामि। भो इन्द्रमूर्ते इहागच्छ इहतिष्ठ।

5. उक्षाय

ॐ उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिम् पितुरा विवेश।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥

- ॐ भुर्भुवः स्वः उक्षाय नमः। उक्षम् आवाह्यामि स्थापयामि। भो उक्ष इहागच्छ इहतिष्ठ।

6. कूष्माण्डाय

ॐ यद्देवा देव हेडनन् देवासश्च कृमावयम् ।
आग्निर्मा तस्मादेनसो विश्वान् मुंचन्त्व ७ हसः ॥

- ॐ भुर्भुवः स्वः कूष्माण्डाय नमः । कूष्माण्डम् आवाह्यामि स्थापयामि ।
भो कूष्माण्ड इहागच्छ इहतिष्ठ ।

॥ अग्नि दिशा - द्वितीय कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

7. वरुणाय

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥

- ॐ भुर्भुवः स्वः वरुणाय नमः । वरुणम् आवाह्यामि स्थापयामि ।
भो वरुण इहागच्छ इहतिष्ठ ।

8. बटुकाय

ॐ नहि स्पशमविदन्नन्यमस्माद वैश्वानरात पुर एतारमग्नेः ।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवा ॥

- ॐ भुर्भुवः स्वः बटुकाय नमः । बटुकम् आवाह्यामि स्थापयामि ।
भो बटुक इहागच्छ इहतिष्ठ ।

9. विमुक्ताय

ॐ मुंचन्तु मा शपथ्या दथो वरुण्यादुत ।
अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्विषात् ॥

- ॐ भुर्भुवः स्वः विमुक्ताय नमः । विमुक्तम् आवाह्यामि स्थापयामि ।
भो विमुक्त इहागच्छ इहतिष्ठ ।

10. लिप्तकायाय

ॐ कुर्वन्ने वेह कर्माणि जिजीविषेच्छत ७ समाः ।
एवन्त्व यिनान्यथे तोस्तिन कर्म लिप्यते नरे ॥

- ॐ भुर्भुवः स्वः लिप्तकायाय नमः । लिप्तकायम् आवाह्यामि स्थापयामि ।
भो लिप्तकाय इहागच्छ इहतिष्ठ ।

11. लीलाकाय

ॐ अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्टयै गोपालं वीर्यायाविपालन् तेजसे जपाल मिरायै कीनाशं कीलालाय सुराकारं भद्राय गृहप ७ श्रेयसे वित्तधमा ध्यक्ष्यायानुक्षत्तारम् ॥

- ॐ भुर्भुवः स्वः लीलाकाय नमः । लीलाकम् आवाह्यामि स्थापयामि ।
भो लीलाक इहागच्छ इहतिष्ठ ।

12. एकदंष्ट्राय

ॐ सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रानरः संच विचन्द्र वन्ति तत्रास्मभ्यमिषवः शर्मय ७ सन ॥

- ॐ भुर्भुवः स्वः एकदंष्ट्राय नमः । एकदंष्ट्रम् आवाह्यामि स्थापयामि ।
भो एकदंष्ट्र इहागच्छ इहतिष्ठ ।

॥ दक्षिण दिशा - तृतीय कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

13. ऐरावताय

ॐ प्रजापतये च, वायवे च, गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्यनाय वर्तिका नीलंगोः कृमिः समुद्राय शिशुमारो हिमवते हस्ती ॥

- ॐ भुर्भुवः स्वः ऐरावताय नमः । ऐरावतम् आवाह्यामि स्थापयामि । भो ऐरावत इहागच्छ इहतिष्ठ ।

14. ओषधिघ्नाय

ॐ ओषधयः समवदन्त सोमेन सहराज्ञा ।
यस्मै कृणोति ब्राह्मणस्त ७ राजन् पारयामसि ॥

- ॐ भुर्भुवः स्वः ओषधिघ्नाय नमः । ओषधिघ्नम् आवाह्यामि स्थापयामि । भो ओषधिघ्न इहागच्छ इहतिष्ठ ।

15. बन्धनाय

ॐ त्र्यम्बकम् यजामहे सुगन्धिम् पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् ॥

- ॐ भुर्भुवः स्वः बन्धनाय नमः । बन्धनम् आवाह्यामि स्थापयामि । भो बन्धन इहागच्छ इहतिष्ठ ।

16. दिव्यकाय

ॐ देव सवितः प्रसुव यज्ञम् प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥

- ॐ भुर्भुवः स्वः दिव्यकाय नमः । दिव्यकम् आवाह्यामि स्थापयामि । भो दिव्यक इहागच्छ इहतिष्ठ ।

17. कम्बलाय

ॐ सीसेन तन्त्रं मनसा मनीषिण ऊर्णा सूत्रेण कवयो वयन्ति ।
अश्विना यज्ञ ७ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यम् ॥

- ॐ भुर्भुवः स्वः कम्बलाय नमः । कम्बलम् आवाह्यामि स्थापयामि । भो कम्बल इहागच्छ इहतिष्ठ ।

18. भीषणाय

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनो निमिष एकवीरः शतं ७ सेना अजयत् साकमिन्द्रः ॥

- ॐ भुर्भुवः स्वः भीषणाय नमः । भीषणम् आवाह्यामि स्थापयामि । भो भीषण इहागच्छ इहतिष्ठ ।

॥ नैर्ऋत्य दिशा - चतुर्थ कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

19. गवयाय

ॐ इम ७ साहस्र ७ शतधारमुत्सं व्यच्यमान ७ सरिरस्य मध्ये। घृतन् दुहानामदितिं जनायाग्ने मा हि ७ सी: परमे व्योमन् ॥ गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नीषीद। गवयन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु।

- ॐ भुर्भुवः स्वः गवयाय नमः। गवयम् आवाह्यामि स्थापयामि।
  भो गवय इहागच्छ इहतिष्ठ।

20. घण्टाय

ॐ कुम्भोवनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे, योऽन्यां गर्भोऽयतः। प्लाशिर्व्यक्तः शतधारऽ उत्सो दुहे न, कुम्भी स्वधाम् पितृभयः ॥

- ॐ भुर्भुवः स्वः घण्टाय नमः। घण्टम् आवाह्यामि स्थापयामि।
  भो घण्ट इहागच्छ इहतिष्ठ।

21. व्यालाय

ॐ आक्रन्दय बलमोजो न आधा निष्ठुनिहि दुरिता बाधमानः। अपप्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥

- ॐ भुर्भुवः स्वः व्यालाय नमः। व्यालम् आवाह्यामि स्थापयामि।
  भो व्याल इहागच्छ इहतिष्ठ।

22. अणवे

ॐ इन्द्रयाहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना पूतासः ॥

- ॐ भुर्भुवः स्वः अणवे नमः। अणुम् आवाह्यामि स्थापयामि।
  भो अणो इहागच्छ इहतिष्ठ।

23. चन्द्रवारुणाय

**ॐ चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि।
रयिम् पिशङ्गम् बहुलम् पुरुस्पृह ७ हरिरेति कनिक्रदत् ॥**

- ॐ भुर्भुवः स्वः चन्द्रवारुणाय नमः। चन्द्रवारुणम् आवाह्यामि स्थापयामि।
  भो चन्द्रवारुण इहागच्छ इहतिष्ठ।

24. पटाटोपाय

ॐ स्वांकृतोसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय देवेभ्य स्त्वा मरीचिपेभ्यो देवा ७ शो यस्मै त्वेडे तत् सत्य मुपरिप्लुता भङ्गेन हतो सौ फट् प्राणायत्वा व्यानायत्वा ॥

- ॐ भुर्भुवः स्वः पटाटोपाय नमः। पटाटोपम् आवाह्यामि स्थापयामि।
  भो पटाटोप इहागच्छ इहतिष्ठ।

॥ पश्चिम दिशा - पंचम कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

25. जटालाय

ॐ उग्रं लोहितेन मित्र ७ सौव्रत्येन रुद्रन् दौर्व्रत्यनेन्द्रम् प्रक्रीडन मरुतो बलेन साध्यान् प्रमुदा। भवस्य कण्य ७ रुद्रस्यान्तःपार्श्वम् महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥

- ॐ भुर्भुवः स्वः जटालाय नमः। जटालम् आवाह्यामि स्थापयामि। भो जटाल इहागच्छ इहतिष्ठ।

26. क्रतवे

ॐ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूँ १ रनु ॥

- ॐ भुर्भुवः स्वः क्रतवे नमः। क्रतुम् आवाह्यामि स्थापयामि। भो क्रतो इहागच्छ इहतिष्ठ।

27. घण्टेश्वराय

ॐ आजिघ्र कलशम् मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सानः सहस्रन् धुक्क्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ॥

- ॐ भुर्भुवः स्वः घण्टेश्वराय नमः। घण्टेश्वरम् आवाह्यामि स्थापयामि। भो घण्टेश्वर इहागच्छ इहतिष्ठ।

28. विटंकाय

ॐ वायो शुक्रो अयामि ते मध्वो अग्रन् दिविष्टिषु। आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥

- ॐ भुर्भुवः स्वः विटंकाय नमः। विटंकम् आवाह्यामि स्थापयामि। भो विटंक इहागच्छ इहतिष्ठ।

29. मणिमानाय

ॐ दैव्या होतारा भिषजेन्द्रेण सयुजा युजा। जगती च्छन्द ऽ इन्द्रियम नड्वान् गौर्वयो दधुः ॥

- ॐ भुर्भुवः स्वः मणिमानाय नमः। मणिमानम् आवाह्यामि स्थापयामि। भो मणिमान इहागच्छ इहतिष्ठ।

30. गणबन्धवे

ॐ त्रीणित आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे। उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥

- ॐ भुर्भुवः स्वः गणबन्धवे नमः। घणबन्धुम् आवाह्यामि स्थापयामि। भो गणबन्धो इहागच्छ इहतिष्ठ।

॥ वायव्य दिशा - षष्ठम कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

31. डामराय

ॐ प्रतिश्रुत्काया ऽ अर्तनं घोषाय भषमन्ताय बहुवादिनम नन्ताय मूक ७ शब्दाया डम्बराघातम् महसे वीणावादं क्रोशाय तूणवध्मम वरस्पराय शंखध्मं वनाय वनपमन् न्यतोरण्याय दावपम् ॥

- ॐ भुर्भुवः स्वः डामराय नमः । डामरम् आवाह्यामि स्थापयामि । भो डामर इहागच्छ इहतिष्ठ ।

32. ढुण्ढिकर्णाय

ॐ शुद्धवालः सर्व शुद्धवालो मणिवालस्तऽ आश्विनाः श्येतः श्येताक्षो रुणस्ते रुद्राय पशुपतये कर्णा यामाऽ अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः॥

- ॐ भुर्भुवः स्वः ढुण्ढिकर्णाय नमः । ढुण्ढिकर्णम् आवाह्यामि स्थापयामि । भो ढुण्ढिकर्ण इहागच्छ इहतिष्ठ ।

33. स्थविराय

ॐ बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान ऽ उग्रः । अभिवीरो ऽ अभिसत्वा सहोजा जैत्र मिन्द्र रथमातिष्ठ गोवित् ॥

- ॐ भुर्भुवः स्वः स्थविराय नमः । स्थविरम् आवाह्यामि स्थापयामि । भो स्थविर इहागच्छ इहतिष्ठ ।

34. दन्तुराय

ॐ सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता । यत्रा नरः संच वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म य ७ सन् ॥

- ॐ भुर्भुवः स्वः दन्तुराय नमः । दन्तुरम् आवाह्यामि स्थापयामि । भो दन्तुर इहागच्छ इहतिष्ठ ।

35. धनदाय

ॐ अग्नेऽ अच्छा वदेहनः प्रतिनः सुमनाभव । प्रनो यच्छ सहस्त्र जित्त्व ७ हि धनदाऽ असि स्वाहा ॥

- ॐ भुर्भुवः स्वः धनदाय नमः । धनदम् आवाह्यामि स्थापयामि । भो धनद इहागच्छ इहतिष्ठ ।

36. नागकर्णाय

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्ये माक्षभिर्यजत्राः ॥ स्थिरै रङ्गै स्तुष्टुवा ७ सस्तनूभि व्यशेमहि देवहितं यदायुः ॥

- ॐ भुर्भुवः स्वः नागकर्णाय नमः । नागकर्णम् आवाह्यामि स्थापयामि । भो नागकर्ण इहागच्छ इहतिष्ठ ।

॥ उत्तर दिशा - सप्तम कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

37. महाबलाय

ॐ बाहू मे बलमिन्द्रिय ७ हस्तौ मे कर्म वीर्य्यम् । आत्मा क्षत्र मुरो मम ॥

- ॐ भुर्भुवः स्वः महाबलाय नमः । महाबलम् आवाह्यामि स्थापयामि ।
  भो महाबल इहागच्छ इहतिष्ठ ।

38. फेत्काराय

ॐ अपाम् फेनेन नमुचेः शिरः इन्द्रोदवर्त्तयः । विश्वा यदजयः स्पृधः ॥

- ॐ भुर्भुवः स्वः फेत्काराय नमः । फेत्कारम् आवाह्यामि स्थापयामि ।
  भो फेत्कार इहागच्छ इहतिष्ठ ।

39. चीकराय

ॐ इद ७ हविः प्रजननम् मे अस्तु दशवीरः सर्वगण ७ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि । अग्निः प्रजाम् बहुलाम् मे करोत्वन्नम् पयो रेतो अस्मासु धत्त ॥

- ॐ भुर्भुवः स्वः चीकराय नमः । चीकरम् आवाह्यामि स्थापयामि ।
  भो चीकर इहागच्छ इहतिष्ठ ।

40. सिंहाय

**ॐ या व्याघ्रं विषूचिकोभौ वृकञ्च रक्षति ।
श्येनम् पतत्रिण ७ सि ७ ह ७ सेमम् पात्व ७ हसः॥**

- ॐ भुर्भुवः स्वः सिंहाय नमः । सिंहम् आवाह्यामि स्थापयामि ।
  भो सिंह इहागच्छ इहतिष्ठ ।

41. मृगाय

**ॐ मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृक ७ स ७ शाय पविमिन्द्र तिग्मं वि शत्रून्ताढि व्मि मृधो नुदस्व ॥**

- ॐ भुर्भुवः स्वः मृगाय नमः । मृगम् आवाह्यामि स्थापयामि ।
  भो मृग इहागच्छ इहतिष्ठ ।

42. यक्षाय

**ॐ देवहूर्यज्ञ ऽ आ च वक्षत्सुम्नहूर्यज्ञ ऽ आ च वक्षत् ।
यक्षदग्निर्देवो देवाँ२ आ च वक्षत् ॥**

- ॐ भुर्भुवः स्वः यक्षाय नमः । यक्षम् आवाह्यामि स्थापयामि ।
  भो यक्ष इहागच्छ इहतिष्ठ ।

43. मेघवाहनाय

**ॐ जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्त्व ७ स त्त्वा वर्मणो महिमा पिपर्तु ॥**

- ॐ भुर्भुवः स्वः मेघवाहनाय नमः । मेघवाहनम् आवाह्यामि स्थापयामि ।
  भो मेघवाहन इहागच्छ इहतिष्ठ ।

॥ ईशान दिशा - अष्टम कोष्टक (ईशान कोण से पूजा करते हुवे) ॥

44. तीक्ष्णोष्ठाय

ॐ तीव्रान् घोषान् कृण्वते वृषपाणयोश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैर मित्रान्क्षिणन्ति शत्रूँ १ रनपव्ययन्तः ॥

- ॐ भुर्भुवः स्वः तीक्ष्णोष्ठाय नमः । तीक्ष्णोष्ठम् आवाह्यामि स्थापयामि ।
भो तीक्ष्णोष्ठ इहागच्छ इहतिष्ठ ।

45. अनलाय

ॐ वायुष्ट्वा पचतैरवत्व सितग्रीवश्छा गैर्न्यग्रोधश्चमसैः शल्मलिर्वृद्धया ।
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन् ब्रह्मा कृष्णश्च नोवतु नमोग्नये ॥

- ॐ भुर्भुवः स्वः अनलाय नमः । अनलम् आवाह्यामि स्थापयामि ।
भो अनल इहागच्छ इहतिष्ठ ।

46. शुक्लतुण्डाय

ॐ अदित्यास्त्वा पृष्ठे सादयाम् म्यन्तरिक्षस्य धर्त्री विष्टम्भनी न्दिशामधिपली भुवनानाम् । ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाद् ध्वर्यु सादयतामिह त्वा ॥

- ॐ भुर्भुवः स्वः शुक्लतुण्डाय नमः । शुक्लतुण्डम् आवाह्यामि स्थापयामि ।
भो शुक्लतुण्ड इहागच्छ इहतिष्ठ ।

47. सुधालापाय

ॐ द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रम्पृणातु ते ।
सूर्यस्तु नक्षत्रैः सह लोकं कृणोतु साधुया ॥

- ॐ भुर्भुवः स्वः सुधालापाय नमः । सुधालापम् आवाह्यामि स्थापयामि ।
भो सुधालाप इहागच्छ इहतिष्ठ ।

48. बर्बरकाय

ॐ सम्बर्हिरङ्क्ता ७ हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः ।
समिन्द्रो विश्वदेवे भिरङ्क्तान् दिव्यं नभो गच्छतु यत् स्वाहा ॥

- ॐ भुर्भुवः स्वः बर्बरकाय नमः । बर्बरकम् आवाह्यामि स्थापयामि ।
भो बर्बरक इहागच्छ इहतिष्ठ ।

49. पवनाय

ॐ पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥

- ॐ भुर्भुवः स्वः पवनाय नमः । पवनम् आवाह्यामि स्थापयामि ।
भो पवन इहागच्छ इहतिष्ठ ।

50. पावनाय

ॐ अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञन् नयत देवता नो घृतस्य धारा मधुमत्यवत्ते ॥

- ॐ भुर्भुवः स्वः पावनाय नमः । पावनम् आवाह्यामि स्थापयामि ।
भो पावन इहागच्छ इहतिष्ठ ।

- हस्ते अक्षतानादाय मनोजूतिरीति मन्त्रेण ॐ भुर्भुवः स्वः क्षेत्रपाल सहीताः अजरादि क्षेत्रपाल देवाः सुप्रतिष्ठिता वरदाः भवत।
- ॐ भुर्भुवः स्वः क्षेत्रपाल सहीतेभ्य अजरादि क्षेत्रपाल देवेभ्यो नमः इति आवाहनादि षोडषोपचारैः पूजनं कुर्यात्।

- **प्रार्थना**
  - **ॐ भूत प्रेत पिशाचाद्यैरावृत्तं शूल पाणिनम्।**
    आवाहये क्षेत्रपालं तु कर्मण्यस्मिन् सुखायनः॥
  - **ॐ नमामि क्षेत्रपाल त्वा मजरादि गणैः सह।**
    पूजां गृहाण मे देव निर्विघ्नं कुरु सर्वादा॥
  - **ॐ नहि स्पशमवि दन्न न्य मस्माद् वैश्वानरात् पुरुएतारमग्ने।**
    एमेन म वृधन्नमृता अमर्त्यम् वैश्वानरं क्षैत्र जिन्याय देवाः॥

- अनेन यथाशक्ति ध्यान आवाहनादि षोडशोपचारै अन्योपचारैश्च कृतेन पूजनेन ॐ भुर्भुवः स्वः क्षेत्रपाल सहीताः अजरादि क्षेत्रपाल देवाः प्रीयन्ताम् न मम।

॥ इति क्षेत्रपाल मण्डल देवता स्थापनम् पूजनम् समाप्तम्॥

॥ श्री क्षेत्रपाल भैरवाष्टक स्तोत्र ॥

यं यं यं यक्ष-रूपं दश-दिशि-वदनं भूमि-कम्पाय-मानम् ।
सं सं सं संहार-मूर्ति शिर-मुकुट-जटा-जूट-चन्द्र-बिम्बम् ॥
दं दं दं दीर्घ-कायं विकृत-नख-मुखं ऊर्ध्व-रोम-करालं ।
पं पं पं पाप-नाशं प्रणमत-सततं भैरवं क्षेत्रपालम् ॥१॥

रं रं रं रक्त-वर्णं कट-कटि-तनुं तीक्ष्ण-दंष्ट्रा-करालम् ।
घं घं घं घोष-घोषं घघ-घघ-घटितं घर्घरा-घोर-नादं ॥
कं कं कं काल-रूपं धिग-धिग-धृगितं ज्वालित-काम-देहं ।
दं दं दं दिव्य-देहं प्रणमत-सततं भैरवं क्षेत्रपालम् ॥२॥

लं लं लं लम्ब-दन्तं लल-लल-लुलितं दीर्घ-जिह्वा-करालं ।
धूं धूं धूं धूम्र-वर्णं स्फुट-विकृत-मुखं भासुरं भीम-रूपं ॥
रुं रुं रुं रुण्ड-मालं रुधिर-मय-मुखं ताम्र-नेत्रं विशालं ।
नं नं नं नग्न-रूपं प्रणमत-सततं भैरवं क्षेत्रपालम् ॥३॥

वं वं वं वायु-वेगं प्रलय-परिमितं ब्रह्म-रूपं-स्वरूपम् ।
खं खं खं खड्ग-हस्तं त्रिभुवननिलयं भास्करं भीमरूपं ॥
चं चं चं चालयन्तं चल-चल-चलितं चालितं भूत-चक्रं ।
मं मं मं माया-रूपं प्रणमत-सततं भैरवं क्षेत्रपालम् ॥४॥

शं शं शं शङ्ख-हस्तं शशि-कर-धवलं यक्ष-सम्पूर्ण-तेजं ।
मं मं मं माय-मायं कुलमकुल-कुलं मन्त्र-मूर्ति स्व-तत्वं ॥
भं भं भं भूत-नाथं किल-किलित-वचश्चारु-जिह्वालुलंतं ।
अं अं अं अंतरिक्षं प्रणमत-सततं भैरवं क्षेत्रपालम् ॥५॥

खं खं खं खड्ग-भेदं विषममृत-मयं काल-कालांधकारं ।
क्षीं क्षीं क्षीं क्षिप्र-वेगं दह दह दहनं गर्वितं भूमि-कम्पं ॥
शं शं शं शान्त-रूपं सकल-शुभ-करं देल-गन्धर्व-रूपं ।
बं बं बं बाल-लीलां प्रणमत-सततं भैरवं क्षेत्रपालम् ॥६॥

सं सं सं सिद्धि-योगं सकल-गुण-मयं देव-देव-प्रसन्नम् ।
पं पं पं पद्म-नाभं हरि-हर-वरदं चन्द्र-सूर्याग्नि-नेत्रं ॥
जं जं जं यक्ष-नागं सतत भयहरं सर्वदेव स्वरुपं ।
रौं रौं रौं रौद्ररुपं प्रणमत-सततं भैरवं क्षेत्रपालम् ॥७॥

हं हं हं हस-घोषं हसित-कहकहा-राव-रुद्राट्टहासम् ।
यं यं यं यक्ष-सुप्तं शिर-कनक-महाबद्-खट्वाङ्गनाशं ॥
रं रं रं रङ्ग-रङ्ग-प्रहसित-वदनं पिङ्गकस्याश्मशानं ।
सं सं सं सिद्धि-नाथं प्रणमत-सततं भैरवं क्षेत्रपालम् ॥८॥

॥फल-श्रुति॥

एवं यो भाव-युक्तं पठति च यत: भैरवास्याष्टकं हि ।
निर्विघ्नं दु:ख-नाशं असुर-भय-हरं शाकिनीनां विनाश: ॥
दस्युर्न-व्याघ्र-सर्प: घृति विहसि सदा राजशस्त्रोस्तथाज्ञातं ।
सर्वे नश्यन्ति दूराद् ग्रह-गण-विषमाश्चेति तांश्चेष्टसिद्धि: ॥